E-ISSN-2584-2870 DOI: https://doi.org/10.65833/dbs.2026.012

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# भागवतोक्तसृष्टिक्रमस्य अद्वैतवेदान्तानुसारमालोचनम्

डॉ.दयानन्दपाणिग्राही
सहायकाचार्य:,अद्वैतवेदान्तविभाग:
कालियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालय:,
हेडिया,पूर्वमेदिनीपुरम्,पश्चिमवंग:
मो।९८६१५१४२७३
Email Id- dayananda356@gmail.com

**शोधसारांशः**

सर्व ज्ञानमनयो हि स इति महर्षिमनुवचनानुसारं वेदस्य सर्वज्ञत्वं प्रतिष्ठितो भवति नितराम्। स च वेद:ः सम्पूर्णज्ञानाकररूप: सर्वपथप्रदर्शकोऽस्तीति संशितिरेव नास्ति। जगतिविद्यमानसर्वमपि तत्त्वं तस्मिन्निहितं वर्तते अत उच्यते - वेदस्य वेदता इत्यादि:। वेदवचनमेवाधारीकृत्य वेदान्तमपि तत्त्वानि वर्णयति। अमुष्मिन् सर्वा: प्रक्रिया: विशेषज्ञानाश्रिता: वैज्ञानिकी एव भवन्ति। एवं वेदवेदान्तमुररीकृत्य भगवता वादरायणाभिधेयेन पुराणानि व्यरचि। तत्रापि सर्वमूर्धन्यभूतं चकास्ति जगति तले श्रीमद्भागवतं महापुराणं यस्मिन् प्रतिपादिता सृष्टिप्रक्रिया अद्वैतवेदान्ताभिमता वैज्ञानिकी चास्तीति प्रपञ्चयितुमिह शोधप्रबन्ध: प्रस्तूयते।

**कूटशब्दा: - भागवतं, श्रीमद्भागवतं, सृष्टिक्रम:, सृष्टिप्रक्रिया, वेदान्तसृष्टिप्रक्रिया ।**

**शोधमुख्यांशः**

पुराणसाहित्यं प्रायः समस्तमपि वेदान्तसम्वलितं विद्यते, यद्यपि उपास्योपासकत्वेनापाततस्तत्र द्वैतं प्रतिभासते गम्भीरतया पर्यालोचनेन्ततः अद्वैतसिद्धान्ते एव पर्यवसानं लक्ष्यते । तथाभूतसाहित्येस्मिन् पुराणशिरोमणिभूतं श्रेष्ठपुराणं श्रीमद्भागवतमिह मूर्धन्यतममुदाहरणं प्रत्युपस्थाप्यते ।

श्रीमद्भागवतकारो व्यासः वेदान्तसूत्रकारो वादरायणनामधेय इत्यस्मिन् विषये सर्वे’पि जना: जानन्त्येव। ब्रह्मसूत्रं भवतु श्रीमद्भागवतपुराणं वा भवतु उभयत्रापि एक एव सिद्धान्तः प्रतिपादितो लक्ष्यते। अपि च श्रीमद्भागवतं ‘पारमहंसी संहिता’ नाम्ना व्यपदिश्यते यत्खलु वेदान्तदर्शनीयसिद्धान्तानेव प्रतिपादयितुमिव प्रवृत्ता प्रतीयते । उपक्रमोपसंहारन्यायेन पश्यामस्तावद्यदि तर्हि नास्तिकश्चित्सन्देहो वेदान्तमयत्वे’स्य श्रीमद्भागवतग्रन्थस्य। नात्र नीरसतया वेदान्तस्य प्रतिपादनमपि तु परमसरसतया भक्तिसम्पुटितं ज्ञानं स्थाने स्थाने भगवत्स्तुतिषु प्राप्यते,

उपदेशप्रसङ्गेषु च ज्ञानस्य पराकाष्ठा प्राप्यते। सम्पूर्णे’पि भागवते सर्वा: विद्या: सर्वाण्यपि तत्त्वान्युपलभ्यन्ते यद्यपि तथापि वेदान्ततत्त्वान्यत्र भृशमुपलभ्यन्ते। वेदान्तशास्त्रे विचारितानि यानि यानि तत्त्वानि सन्ति तानि सर्वाण्यपि श्रीमद्भागवते प्राप्यन्ते। तेषु तत्त्वेष्वत्र सृष्टिक्रमतत्त्वमुररीकृत्येह किञ्चित्प्रस्तूयते।

‘सृष्टिक्रम’ इति श्रवणमात्रेण समुदेति नो जिज्ञासा अथ केयं सृष्टिः? किं चास्याः स्वरूपम् ? इति ।

अथ सृष्टिर्नाम उत्पत्त्यनुकूलव्यापारविशेषः , संसाररचना वा । क्रम: इत्यनेन प्रक्रिया इति व्यवह्रियते। प्रक्रिया नाम प्रकृष्टा क्रिया इत्यस्य पदस्यार्थः , ‘संसाररचना’ वा सृष्टिरिति । इयं सृष्टिप्रक्रिया श्रुतिस्मृतिपुराणादिषु बहुधा चर्चिता अस्ति ।

पुन: सृष्टिर्नाम वयं कार्यरूपमपि वक्तुं शक्नुमः । यतो हि कारणं यदा विकारात्मना परिणमते तदानीं कार्यमिति प्रचक्षते। यथा मृद् कार्यात्मना प्रवर्तमाने घटरूपं नूतनं संरचनं विदधाति । तदेव मृदः घटरूपेण सृष्टिरिति । तत्र पुनः चेतनकर्त्ता कश्चन अपेक्षते कुलालवत् । अत: कुलालेन मृत्तिकया घटस्य सृष्टिः क्रियते इति । तस्मात् कारणद्वयमपेक्षते सृष्टेः । कारणद्वये एकं मूलभूतं कारणमुपादानम् , अन्यन्निमित्तभूतं निमित्तकारणम् इति। अनेन जगतः कश्चन कर्त्ता किमपि उदापानं स्यात् इति निपतति प्रश्ने मायायाः, ईश्वरादिति च सृष्टिरिति समादधुः अद्वैतिनः।

वस्तुतः ‘सृष्टिक्रमः’ इत्यनेन जगतः विस्ताररूप प्रक्रिया च व्याख्येया । तत्र मायोपहितः परमेश्वरः एव जगतः स्रष्टा । यतो हि नाचेतनं किमपि स्रष्टुत्वमधिगच्छति, जडत्वात्, घटस्य घटवत् । अर्थात् घटस्योत्पत्तौ घटः अथवा मृन्नैव साक्षात् कारणं परन्तु चेतनकुलालः तत्र भवति सृष्टये । तथैव जगतः अपि कर्त्ता चेतन: परमेश्वरः एव भवति न तु अचेतनं प्रधानम् इति ईक्षत्यधिकरणे, संख्योपसंग्रहाधिकरणे भगवता शङ्करेण व्याससूत्रानुसारं प्रत्यपादि। तस्मात् मायोपहितं परमेश्वरः एव सत्त्वरजतमोगुणात्मिकया मायया सृष्टिं रचयति । उक्तं हि देवात्मशक्तिं स्वगुणैर्निगूढाम्[१] । एतन्मायोपहितः परमेश्वरः नामरूपात्मकनिखिलप्रपञ्चं पूर्वसर्गानुरूपं पूर्वसर्गे यद्यद् वस्तु यत् यन्नामकं यद्यदाकारं च आसीत् तदनुसारम् - बुद्धौ मायावृत्तौ वा विषयीकृत्य इदं करिष्यामि इदं भविष्यामि इति प्रथमं बहुत्वाय ईक्षां करोति - संकल्पयति । सृष्टेः संकल्पपूर्वकत्वे ‘तदैक्षत बहुस्यां प्रजायेय’[२], सो’कामयत बहुस्यां प्रजायेयेति[३], स ऐक्षत लोकान्नु सृजे[४] इत्यादि श्रुतयः मानानि । तादृश संकल्पानन्तरं तमः-प्रधानविक्षेपशक्तिद् अज्ञानोपहितचैतन्यात् प्रथमम् आकाशः, ततो वायुः, ततस्तेजः, ततो जलम्, ततः पृथिवी इत्येवं क्रमवन्ति अपञ्चीकृतानि - भूतान्तरैः असंसृष्टानि शुद्धानि वा - पञ्चभूतानि उत्पद्यन्ते । ‘तस्माद्वा एतस्मादात्मनः आकाशस्सम्भूतः आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः पृथिवीत्यादि’[५] इति । एवं ‘स ईक्षां चक्रे बहुस्यां प्रजायेय’[६], ‘हन्ता’हं तिस्र देवतानेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि’[७], ‘तत्सृष्ट्वा तदेवानुप्राविशत्’[८] इति औपनिषत्सृष्टिप्रक्रिया अद्वैतिनः आमनन्ति । किञ्च कारणमपि तटस्थलक्षणेन ‘यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व तद्ब्रह्मेति’[९] ब्रह्मैवेति साधयन्ति । ब्रह्मणः जीवात्मनि अनुप्रवेशश्रुत्या एकमेव ब्रह्म स्वात्मानं जीवरूपेण व्यज्यते इति अभिलपन्ति च । एवमाकाशादीनामुत्तरभूताद्यपेक्षया महत्त्वमपि उपपन्नं भवति एकदेशेन । आकाशादौ च जाड्यादिदर्शनात् तमः प्राधान्यं तत् कारणस्य इति तमोगुणप्रधानविक्षेपशक्तियुक्ताज्ञानवच्छिन्नस्य चैतन्यस्य एव आकाशादिप्रपञ्चजनकत्वम् । कारणगुणाः हि कार्यगुणान् आरभन्ते इति न्यायात् ।

एवं वेदान्तिनां नये आत्मा नित्यशुद्धबुद्धमुक्तस्वभावः कूटस्थश्च । अचिन्त्यरचनारूपो'यं प्रपञ्चः अस्य कार्यम् । अनया प्रक्रियया श्रीमद्भागवते'पि ब्रह्मणः जगत्स्रष्टृत्वं सृष्टिक्रमे आलोच्यते । तद्यथा -

एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यन्तयोः पृथगवस्यसि मध्यतश्च

सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः।[१०]

अयम्भावः भावार्थदीपिकायाम् - कुतस्तर्हि भेदप्रतीतिस्तत्राह - निजमायया गुणपरिणामात्मकमिदं जगत्सृष्ट्वा तदनुप्रविष्टस्त्वं तैर्गुणैर्हेतुभूतैः नानेव इति । अर्थात् परमेश्वरः एव जीवात्मनाऽनुप्रविश्य स्वं नानारूपेण मायया व्याकरोति कारणं च भवति ।

'इन्द्रो मायाभिः पुरुरूप ईयते'[११] इति श्रुत्यनुसारं जगतः सृष्टेः ब्रह्म कारणमिति संसूच्यते । कथं कारणमित्युक्ते स्वं स्वात्मानं बहुधा करोति अत:। एतस्य प्रमाणत्वेन भागवते -

यो माययेदं पुरुरूपयासृज द्बिभर्ति भूयः क्षपयत्यविक्रियः ।

यद्भेदबुद्धिः सदिवात्मदुःस्थया [१२] इत्यादि।

एवं ब्रह्मणः जीवात्मनि प्रवेशात्मकसृष्टिक्रमविषये श्लोकोऽयम् -

स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकम् ।

तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे।।[१३]

एवं पूर्वपूर्वगुणान् अनुसृत्य पूर्ववत् सृष्टिः मायावृत्तौ विषयीकृत्य एवं वद्यां सृष्टिं संरचयति इति विषये -

यथेमे'विकृता भावास्तथा ते विकृतैः सह

नानावीर्याः पृथग्भूतां विराजं जनयन्ति हि।।[१४]

सन्निपत्य समुत्पाद्य दृश्यन्ते'नुगता इव

प्रागेव विद्यमानत्वात् न तेषामिह संभवः।।[१५]

अनया अचिन्त्यरचनारूपो'यं प्रपञ्च अस्यैव कार्यं भवति। जगदुत्पत्तिं प्रति ब्रह्म विवर्तोपादानमित्युच्यते । अद्वैतिनः सृष्टिक्रमः इत्थम् - सर्गास्यारम्भे ईश्वरः जगन्निर्माणाय संकल्पः अकरोदिति श्रुत्या प्रतिपाद्यते । एषा सिसृक्षावृत्तिरेव तस्मै चराचरमिदं निर्माणाय अभिप्रेरयामास । तस्माद्विचित्रमिदं विषमजगतः उत्पत्तिरभूत्। एतस्यैव मूलकारणं भवति कर्म । सर्वेषां प्राणिनां स्वस्वकर्मानुसारं फलोपभोगाय तानुद्दिश्य एव परमेश्वरः सर्गरचनायां प्रवृत्तो भवति । एतस्मिन् सन्दर्भे - तमः प्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुर्वायो-रग्निरग्नेरापो'द्भ्यः पृथिवी चोत्पद्यते । 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यादि श्रुतेः।[१६]

नाम- तमोगुणप्रधानविक्षेपशक्त्या युक्त-अज्ञानोपहितचैतन्यात् आकाशस्य सर्वप्रथमोत्पत्तिरजायत । ततः वाय्वादिभूतानां यथाक्रमं पृथिव्यन्तं यावत् । अथ चैतन्यरूपात् ईश्वरतः एव भूतानां सृष्टिरिति ।

इदमित्थं भागवतकारः निर्णयाञ्चकारः श्रीमद्भागवते -

आत्माह्येकः स्वयं ज्योतिर्नित्यो'न्यो निर्गुणो गुणैः

आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते।

खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथाशयम्

आविस्तिरो'ल्पभूर्येको नानात्वं यात्यसावपि॥[१७]

एकमेवाद्वितीयात् ब्रह्मणः आकाशादीनामुत्पत्तिरजायत इति भावार्थः।

यत्पुनरुक्तं तमोगुणप्रधानात् विक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी चोत्पद्यते । तच्च भागवते द्वितीयस्कन्धस्य षष्ठाध्याये सृष्टिक्रमप्रसङ्गे सप्रपञ्चं उक्तं भागवताकारेण । तद्यथा -

तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ।

सृज्यं सृजामि सृष्टो'हमीक्षयैवाभिचोदितः॥[१८]

अर्थात् 'तदैक्षत बहुस्यां'[१९] इति श्रुत्यात्मना इदं व्यरचि सृष्टिक्रमारम्भाय । ततः 'अजामेकां लोहितशुक्लकृष्णा'इत्यादिभिः श्रुतिवाक्यैः निर्गुणस्य मायारूपकारणगुणात्मना सृष्टिक्रमरूपक्रमं यन्निर्वहितं तद् -

सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ।

स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥

कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः

बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः॥[२०]

एवं च स्वयमेव परमेश्वरः एतान् गुणान्नाश्रित्य स्वयमेव आवृत्तो'भवत् येन मायापतिना स्वेच्छया एवानन्तरं कालकर्मस्वभावाश्रयेण स्वं बहुधा'करोत् । ततः भगवता'त्मना तमः प्रधानविक्षेपशक्त्या आकाशादीन् स्वयं चोत्पादयामास । उक्तं हि -

तमसादपि भूतादेर्विकुर्वाणादभून्नभः

तस्य मात्रा गुणः शब्दो लिङ्गं यद् द्रष्टृदृश्ययोः।

नभसो'थ विकुर्वाणादभूत् स्पर्शगुणो'निलः

परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलम्।

वायोरपि विकुर्वाणात् कालकर्मस्वभावतः

उदपद्यत तेजो वै रूपवत् स्पर्शशब्दवत्।

तेजसस्तु विकुर्वाणादासीदम्भो रसात्मकम्

रूपवत् स्पर्शवच्चाम्भो घोषवच्च परान्वयात्।

विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत्

परान्वयाद् रसस्पर्शशब्दरूपगुणान्वितः॥[२१]

एतदेव वेदान्तपरिभाषायामित्थं -'आकाशादीनि पञ्चुभूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपाद्नि उत्पद्यन्ते । तत्राकाशस्य शब्दोगुण: । वायोस्तु शब्दस्पर्शौ । तेजसस्तु शब्दस्पर्शरूपाणि । अपां तु शब्दस्पर्शरूपरसाः । पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः।'[२२]

तन्मात्राणि - सूश्माशाः । तानि - शब्दतन्मात्र - स्पर्शतन्मात्र - रूपतन्मात्र - रसतन्मात्र- गन्धतन्मात्राणि इति । इमानि सूक्ष्मभूतानि अपञ्चीकृतपञ्चभूतानि तन्मात्राणीत्यादिशब्दैर्व्यपदिश्यन्ते । ततः आकाशादिगतपृथक्सत्त्वांशेभ्यः पञ्चज्ञानेन्द्रियाणि, मिलितसत्त्वांशेभ्यः मनोबुद्धिचित्ता'हङ्काराश्च जायन्ते । आकाशादिगतपृथक्रजोगुणेभ्यः पञ्चकर्मेन्द्रियाणि मिलितरजोगुणेभ्यः पञ्चप्राणाश्च उत्पद्यन्ते । तथा हि भागवते -

तैजसात्तु विकुर्वाणादिन्द्रियाणि दशाभवन् ।

ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणश्च तैजसौ ॥

श्रोत्रं त्वग्घ्रणदृग्जिह्वावाग्दोर्मेढ्राङ्घ्रिपायवः॥[२३]

आशयः दशेन्द्रियाणि अभवन् । पञ्चज्ञानेन्द्रियाणि- श्रोत्र-त्वक्-चक्षु-जिह्वा-घ्राणाख्यानि तथा पञ्चकर्मेन्द्रियाणि - वाक् - पाणि - पाद - पायु - उपस्थाख्यानि । एवमेतानि मिलित्वा सूक्ष्मशरीरमिति उच्यते । धर्मराजाध्वरीन्द्रेण इदमेवाविष्कृतम् -इमानि भूतानि त्रिगुणमायाकार्याणि त्रिगुणानि । गुणास्सत्वरजस्तमासिं । एतैश्च सत्त्वगुणोपेतैः पञ्चभूतैर्व्यस्तैः पृथक् पृथक् क्रमेण श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि जायन्ते । श्रोत्रादीनां क्रमेण दिग्वातार्कवरुणाश्विनो'धिष्ठातृदेवताः । मन-आदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युताधिष्ठातृदेवताः ।

भागवतकारेणैतद् -

देवा वैकारिका दश । दिग्वातार्क प्रचेतो'श्विवह्नन्द्रोपेन्द्रमित्रकाः।[२४]

पुनः रजोगुणोपेतैः पञ्चभूतैर्व्यस्तैर्यथाक्रमं वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि जायन्ते । तेषां च क्रमेण वह्नन्द्रोपेन्द्रमृत्युप्रजापतयो'धिष्ठातृदेवताः । रजोगुणोपेतपञ्चभूतैरेव मिलितैः पञ्चवायवः प्राणापानव्यानोदानसमानाख्या: जायन्ते ।

एतैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतानि जायन्ते । एषा प्रक्रिया एव पञ्चीकरणप्रक्रिया इत्युच्यते । तासां त्रिवृतं त्रिवृतमेकैकां करवाणि [२५] इति श्रुतेः पञ्चीकरणोपलक्षणम्।

एतदेव पञ्चात्मकेषु भूतेषु, पञ्च पञ्चैकमनसा [२६] इत्यादिभिः स्वीकृतमस्ति ।

एतदतिरिच्य अव्यक्ताद्व्यक्तरूपेण, एकरूपाद्बहुरूपेण, निराकारात् साकाररूपेण, सूक्ष्मतः स्थूलरूपेण चाविर्भावो'पि भागवताः सृष्टिरित्यामनन्ति । एतच्च परिणामं प्रकृत्या स‹‹टते । भागवते अनेकस्थलेषु माया प्रकृतिरिति एकार्थकत्वेनोच्यते । प्रकृतिः ,जीवः तथा विविधकार्यरूपेण स्वयं परमात्मा एव आत्मानं सृजति । तस्मात् सुकृतं स्वयं कत्रेति उच्यते । सः एव स्रष्टा, सृज्यः तथा सृष्टिर्भवति । नान्यत् किञ्चनास्ति । दृश्यमानं जगत् स्वप्नवत् आभासते केवलम् असत्रूपम् । एवं मायातः सृष्टिरिति जायते । किञ्च तृतीयस्कन्धे परमाणुसंयोगादित्यपि श्रूयते ।

एवमेतादृश विभिन्नता-दर्शनस्याभिप्रायस्तत्त्वदर्शनमेव भवति । सृष्टिक्रमस्तु अनादिरयम् । एतच्च श्रुतिस्मृतिभ्यां बहुधा वर्णितो'स्ति। सृष्टेरनु प्रलयः, ततः पुनसृष्टिरिति परम्परा अनादिः । जीवानां कर्मफलभोगाय चातुर्विध्यं कर्महेतुनिर्दिष्टं धर्मार्थकाममोक्षरूपम् । कर्म कृत्वा पुरुषार्थसाधनाय सृष्टिः । पुरुषार्थेषु चरमो मोक्षः । अत मोक्षहेतोः संसारस्य सृष्टिरिति सिद्धान्त:। एवं श्रीमद्भागवते अद्वैतवेदान्ताभिमतसृष्टिप्रक्रिया वर्णिता यदिह समासेन प्रदर्शिता।

**पादटिप्पणी**

०१। श्वेताश्वतरोपनिषद् १।३

०२। छान्दोग्योपनिषद्।६।२।३

०३। तैत्तिरीयोपनिषद्।२।६

०४।ऐतरेयोपनिषद्।४।१।२

०५। तैत्तिरीयोपनिषद्।२।१

०६। प्रश्नोपनिषद्।६।३

०७। छान्दोग्योपनिषद्।३।६।२

०८। तैत्तिरीयोपनिषद्।३।६

०९। तैत्तिरीयोपनिषद्३।१

१०। श्रीमद्भागवतं ७।९।३०

११। वेदान्तपरिभाषा।पृ।१४

१२। श्रीमद्भागवतं४।२४।६१

१३।श्रीमद्भागवतं १०।३।१४

१४। श्रीमद्भागवतं१०।३।१५

१५। श्रीमद्भागवतं १०।३।१६

१६। वेदान्तसार: ,पृ।२६

१७। श्रीमद्भागवतं १०।८५।२४-२५

१८। श्रीमद्भागवतं २।५।१७

१९। छान्दोग्योपनिषद् ६।२।३

२०। श्रीमद्भागवतं २।५।१८-१९

२१। श्रीमद्भागवतं २।५।२५-२९

२२। वेदान्तपरिभाषा ।पृ। १७३

२३। श्रीमद्भागवतं२।५।३१

२४। श्रीमद्भागवतं २।५।३०

२५। छान्दोग्योपनिषद्६।३।३०

२६। श्रीमद्भागवतं११।२२।२२

## ग्रन्थसूची

०१। श्रीशङ्कराचार्य:।(सं०२०६७)। तैत्तिरीयोपनिषद्भाष्यम्(सानुवाद -शांकरभाष्यसहितम्)। गोरखपुरम्: गीताप्रेस्।

०२। श्रीशङ्कराचार्य:।(सं०२०७२)। छान्दोग्योपनिषद्भाष्यम्(सानुवाद-शांकरभाष्यसहितम्)।गोरखपुरम्: गीताप्रेस्।

०३। श्रीशङ्कराचार्य:।(सं०२०६६)। ईशादिदशोपनिषद्भाष्यम्(सानुवाद-शांकरभाष्यसहितम्)। गोरखपुरम्: गीताप्रेस्।

०४। श्रीशङ्कराचार्य:।(सं०२०६७)। प्रश्नोपनिषद्भाष्यम्(सानुवाद-शांकरभाष्यसहितम्)।गोरखपुरम्: गीताप्रेस्।

०५। श्रीशङ्कराचार्य:।(सं०२०६७)। ऐतरेयोपनिषद्भाष्यम्(सानुवाद-शांकरभाष्यसहितम्)।गोरखपुरम्: गीताप्रेस्।

०६।श्रीशङ्कराचार्य:।(२०१६)। ब्रह्मसूत्रशाङ्करभाष्यम् (सत्यानन्दी-दीपिकयासमलङ्कृतम्)। सरस्वती, सत्यानन्द:(सम्पा)। वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान।

०७। सदानन्दयति: । (१९९३) । वेदान्तसार: (हिन्दीव्याख्यासहित:)। शुक्ल:, बदरीनाथ: (व्याख्याता)। वाराणसी : मोतीलाल बनारसीदास।

०८। धर्मराजाध्वरीन्द्र:।(२००८)।वेदान्तपरिभाषा ।सम्पा।धिताल विश्वनाथ:।वाराणसी : श्री दक्षिणामर्तिमठ।

०९। वेदव्यास:।(१९९२)।श्रीमद्भागवतमहापुराणम् (श्रीधरी व्याख्या)। वाराणसी : मोतीलाल बनारसीदास।

★★★★★★★